

# ॥ श्रीपञ्चमुखि हनुमत् पञ्चरत्नं – श्रीवेङ्कटाचार्य कृतम् ॥

## Sri Panchamukhi Hanumat Pancharatnam – Sri Venkatacharya

The following is a rare hymn on on **Lord Hanuman (Panchamukhi – Five Faced)** by **Sri Venkatacharya.** The brief Phalashruti mentions that one who recites this hymn with devotion will get their rightful wishes fulfilled by the grace of **Sri Bhagavan**.

श्रीराम-पाद-सरसीरुह-भृङ्गराज
संसार वार्धि पतितोद्धरणावतार ।
दोः साध्य राज्य धनयोषिददभ्र-बुद्धे
पञ्चाननेश मम देहि करावलम्बम् ॥ १ ॥

आप्रातरात्रिशकुनाथ निकेतनालि
सञ्चारकृत्य पटुपाद युगस्य नित्यम् ।
मानाथ सेविजन सङ्गम निष्कृतं नः
पञ्चाननेश मम देहि करावलम्बम् ॥ २ ॥

षड्वर्ग-वैरि-सुख-कृद् भव-दुर्गुहायां
अज्ञान गाढ तिमिराति भय-प्रदायाम् ।
कर्मानिलेन विनिवेशित देहधर्तुः
पञ्चाननेश मम देहि करावलम्बम् ॥ ३ ॥

सच्छास्त्र-वार्धि परिमज्जन शुद्ध-चित्ताः
त्वत्-पाद-पद्म-परिचिन्तन-मोद-सान्द्राः ।
पश्यन्ति नो विषय दूषितं मानसं मां
पञ्चाननेश मम देहि करावलम्बम् ॥ ४ ॥

पञ्चेन्द्रियार्जित महाखिल पाप कर्मा
शक्तो न भोक्तुं इव दीनजनो दयालो ।
अत्यन्त दुष्ट मनसो दृढ-नष्ट-दृष्टेः
पञ्चाननेश मम देहि करावलम्बम् ॥ ५ ॥

## ॥ फलश्रुतिः ॥

इत्थं शुभं भजक वेङ्कट पण्डितेन
पञ्चाननस्य रचितं खलु पञ्चरत्नम् ।
यः पापठीति सततं परिशुद्ध भक्त्या
सन्तुष्टिमेति भगवान् अखिलेष्टदायी ॥ ६ ॥

---

**॥ इति श्रीवेङ्कटाचार्य कृतं श्रीपञ्चमुखि हनुमत् पञ्चरत्न स्तोत्रं सम्पूर्णम् ॥**